# Brahmakritam 15 Vishnu Stotram

# ब्रह्मकृतं १५ विष्णुस्तोत्रम्

## Document Information

Text title : Brahmakritam 15 Vishnu Stotram

File name : brahmakRRitaM15viShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 78/20-31||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 25, 2025

*sanskritdocuments.org*

# ब्रह्मकृतं १५ विष्णुस्तोत्रम्

ब्रह्मन्कथं त्वया संस्मारितोऽहं द्वापुरे युगे ॥ २०॥

ब्रह्मोवाच ।
तदा देवं सर्वगं भिषजां वरम् ।
नमस्करोमि देवेश वन्दे युगलपङ्कजम् ॥ २१॥

नमो ह्यणुस्वरूपाय ह्यणुकाय नमो नमः ।
त्र्यणुकाय नमश्चतुरणुकाय नमो नमः ॥ २२॥

नमः पञ्चाणुरूपाय रजोरूपाय ते नमः ।
नमो धूलीस्वरूपाय नमस्ते कङ्करात्मने ॥ २३॥

नमो ग्रावस्वरूपाय नमस्ते पिण्डनामिने ।
नमः पिण्डाढ्यबीजाय नमोऽव्यक्ताङ्करात्मने ॥ २४॥

नमः पत्रस्वरूपाय नमः काण्डादिरूपिणे ।
नमः शाखप्रशाखाय नमः स्तम्बादिहेतवे ॥ २५॥

नमो नालाय पुष्पाय नमो रसफलात्मने ।
नमः कणस्वरूपाय नमः पिष्टरसात्मने ॥ २६॥

नमोऽपाकजरूपाय पक्वरूपाय ते नमः ।
नमो भक्ष्यभोज्यलेह्यचोष्यरूपाय ते नमः ॥ २७॥

नमो मिश्रस्वरूपाय नम ओषधिरूपिणे ।
नमः क्वाथादिरूपाय नमश्चूर्णादिरूपिणे ॥ २८॥

नमो रेचकमात्राय नमो भस्मादिवेदिने ।
नम आयुःप्रदात्रे ते नम ओषधिशक्तये ॥ २९॥

नमस्ते परमेशान क्षेमकुशलकीर्तये ।
भोक्त्रे भोग्यप्रदानाय सर्वान्तर्यामिणे नमः ॥ ३०॥

देवदेव शरीराणां धाता त्वं पोषकोऽविता ।
युगेऽस्मिन्कल्पनासिद्धिर्लयं प्रयाति देहिनाम् ॥ ३१॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ७८-अध्यायान्तर्गतं ब्रह्मकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ७८/२०-३१॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 78/20-31..

Proofread by PSA Easwaran

*Brahmakritam 15 Vishnu Stotram*
pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*